International Journal of Jyotish Research
(वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2020; 5(1): 37-39
© 2020 Jyotish
www.jyotishajournal.com
Received: 18-01-2020
Accepted: 20-02-2020

**रानी कुमारी**
गवेषिका, स्ना.ज्योतिषविभाग:, का.सिं.
द.संस्कृतविश्वविद्यालय:, दरभङ्गा,
बिहार:, भारत

**Correspondence**
**रानी कुमारी**
गवेषिका, स्ना.ज्योतिषविभाग:, का.सिं.
द.संस्कृतविश्वविद्यालय:, दरभङ्गा,
बिहार:, भारत

# ज्योतिषशास्त्रदिशा दाम्पत्यविचार:

**रानी कुमारी**

## प्रस्तावना

अष्टादशऋषिभिर्प्रणीतं प्रतिष्ठितं चास्माकं ज्योतिषशास्त्रं कालविधानशास्त्रत्वेन वरीवर्त्ति। सर्वस्मिन् कर्मणि अस्योपयोगित्वात् ''विनैदखिलं श्रौतं स्मार्त्तं कर्म न सिध्यति'' नारदवचनाच्चेति। वेदस्य षडङ्गमध्ये नेत्ररूपत्वेन प्रकाशितं विद्यते। अतो सर्वकर्मारम्भेऽस्य प्रयोजनं सिद्धं भवति। सृष्टिराद्ये एवं सकलचराचरप्राणीनां जीवजन्तूनां मध्ये प्रकृतिपुरुषयोर्विलक्षणा कल्पना गृहस्थाश्रमाणां प्राणीनां कृते अनुपमेया विद्यते यतोऽतिकष्टजालोत्पादितनानाविधान्नादिखाद्यपदार्थप्रबन्धै: मञ्जुलसुखनिकरै: साकं यापयमाना: स्वजीवनानि, निर्वर्तयन्ति चाखिलशरीरिजीवनयात्रां, सन्तोषयन्ति च नानाबल्युपहारै: परित्यक्तसांसारिकसुखहेतून् तपोधनधनिकान् वानप्रस्थब्रह्मचारिप्रभृतीन् देवान् पितृंश्च। उक्तञ्च-

> वानप्रस्थो ब्रह्मचारी यतिश्चैव तथा द्विजा:।
> गृहस्थस्य प्रसादेन जीवन्त्येते यथाविधि:।।
> गृहस्थ एव जयति गृहस्थस्तप्यते तप:।
> ददाति च गृहस्थश्च तस्माच्छ्रेयान् गृहाश्रमी।। [1]

परश्चैतादृशाखिलप्रयोजनीयं कल्याणसमभीप्सुभि: स्त्रीं विना सर्वथा सर्वदा सर्वत्र च विधातुं न शक्यते। अतो ज्योतिषशास्त्रदिशा सौभाग्यादिविचारं दाम्पत्यजीवनं च शुभतिथिवारनक्षत्रमासराशिलग्नमुहूर्त्तै: एव तद्रक्षणीयं भवति नान्यथा। दाम्पत्यजीवने स च विवाह: स्त्रीपुरुषद्वयायत्त:। तत्रापि बहुधापुरुषायत्त:।

> अनाश्रमी न तिष्ठेत् क्षणमेकमपि द्विज:।
> आश्रमादाश्रमं गच्छेदेष: धर्म: सनातन:।। इति च स्मरणात्।

इतराश्रमोपजीव्यतया प्राधान्याश्चेति समावर्त्तनानन्तरं पुरुषावश्यं विवाहेयतितव्यम् अतो स्त्रीदाम्पत्य जीवनेऽस्यावश्यकता वरीवर्त्ति। किञ्च अग्निहोत्रादीनां नित्यं कर्मणां पत्नीं विना नाधिकार इति स्मृतिश्रौतस्मरणात् ''नापुत्रस्य लोकोऽस्ति'' श्रुत्यापुत्राभावे परलोके दुर्गति: बोधनाच्च। तत्र पुत्रादुत्पत्तिस्तु दम्पतयो: आनुकूल्यं विना न स्यात्।
''यत्रानुकूल्यं दम्पत्योस्त्रिवर्ग: तत्र वद्र्धते'' [2] इति त्रिवर्गो- धर्मार्थकामात्मक:। स च ज्योतिश्शास्त्रैकदेशे सर्वं प्रयोजनं विवाहत्वादेव संभवति। कथितञ्च रामाचार्येण-

> भार्या त्रिवर्गकरणं शुभशीलयुक्ता शीलं शुभं भवति,
> लग्नवशेन तस्या। तस्माद्विवाहसमय: परिचिन्त्यते हि
> तन्निघ्नतामुपगता सुतशीलधर्मा:।। [3]

यतः सुतशीलधर्माः तन्निघ्नतां विवाहाधीनता ''अधीनोविघ्न आयत्तः'' इति त्रिवर्गो धर्मकामार्थश्चतुर्वगः समोक्षकैरिति चामरः। उक्तञ्च कश्यपेन-

अथातः सम्प्रवक्ष्यामि गृहस्थाश्रममुत्तमम्।
य आधारोन्याश्रमाणां भूतानां प्राणिनां तथा।।
ऋणत्रयच्छेदकारि धर्मकामार्थसिद्धिदम्।
एतत्सर्वं स्थितं स्त्रीषुशीलवृत्तान्वितासु च।।
तच्छीलवृत्तिलब्धिस्तु सुलग्नवशतो भवेत्।
तस्मात्सम्यग्लग्नशुद्धिं प्रवक्ष्यामनु पूर्वशः।।[4]

वशिष्ठोऽपि -

कश्चिद् गृहाश्रमसमो न परोस्ति धर्मः।
सोपिस्थितः सुवृत्तगुणवृत्तयुताङ्गनासु।।
उद्वाहलग्न वशतो गुणवृत्तिलब्धि-
स्तासा तथा विधसुलग्नमतः प्रवच्मि।।[5]

ननु जन्मकालीखेचरावेदित शुभसमयारब्ध विधिजन्यापूर्वजनित शुभफलेन जन्मान्तरीय दूरदृष्टध्वंशो भवतीत्येवमर्थतया सार्थकयात् इति उत्पलेन कथितम्। अत एवाह सत्याचार्यः-

शुभक्षणक्रियारम्भ जनिताः पूर्वसंभवाः।
संपदः सर्वलोकानां ज्योतिष तत्र प्रयोजनम्।।[6]

एवं वृत्तबन्धादपि द्रष्टव्यम्। दैवज्ञसम्मुखे केन प्रकारेणोपस्थितो भवति प्रश्नकर्ता इत्यस्य विवेचनं वर्णयति-

आदौ सम्पूज्य रत्नाभिरथ गणकं वेदयेत्स्वस्थचित्तं
कन्योद्वाहं दिगीशानलहयविशिखे प्रश्नलग्नाद्यदिन्दुः।
दृष्टो जीवेन सद्यो परिणयकरो गोतुला कर्कटारख्यं
वात्सयात्प्रश्नस्य लग्नं शुभश्वचरयुतालोकितं तद्विदध्यात्।।[7]

विषयेऽस्मिन् महर्षिवशिष्ठस्य वचनमत्र-

शुभे दिने दैवविद्वत्वभिज्ञं ताम्बूलपुष्पाक्षतपूर्णपाणिः।
प्रष्टा च गत्वा प्रणिपत्यपृच्छोन्निवेद्य तस्मै वरकन्ययोर्भाम्।।[8]

वराहस्य प्रसिद्धो टीकाकार उत्पलोऽपि-

प्रष्टामणिकनयुतैः फलकुसुमैराशिचक्रमभ्यर्च्य।
पृच्छेद्यथा मिलषितं भक्त्या विनयान्वितः प्रश्नम्।।[9]

अनेन प्रकारेण सौभाग्यादिरक्षणार्थं दाम्पत्यजीवनस्य सुखसौमनस्य कामनया एवं कर्त्तव्यं परमावश्यकं भवति। अस्मिन् प्रसङ्गे ग्रहयोगं वर्णयति श्रीरामाचार्यः-

विषमभांश गतौ शशिभार्गवौ तनुगृहं बलिनौ यदि पश्यतः।
रचयतो बरलाभमिमौ यदा युगलभांशगतौ युवितिप्रदौ।।[10]

यदा इमौ शशिभार्गवौ युग्मराशिगतौ युग्मभांशगतौ च यदि बलिनौ स्तः तनुगृहमपि पश्यतौ तदा कन्याप्रदौ स्यातामिति। तत्रैव प्रश्नलग्नात् वैधव्ययोगविचारं निगदति-

षष्ठास्थः प्रश्नलग्नाद्यदीन्दुर्लग्ने क्रूरः सप्तमे वा कुजः स्यात्।
मूर्त्ताविंदुः सप्तमे तस्य भौमो रंडा सा स्यादष्ट सम्वत्सरेण।।[11]

अर्थात् यदा प्रश्नलग्नाच्चन्द्रः षष्ठाष्टमस्थः भवेत्तदा अष्टसम्वत्सरेण रंडा भर्तृनाशिका भवति। अत्र कश्यपोऽपि-

एकोलग्नगतः पापः पापोन्यः सप्तराशिगतः।
असप्तमाब्दामरणं पुरुषस्य न संशयः।।[12]

नारदोऽपि-

यदि लग्नगतश्चन्द्रस्तत्सप्तमात् सप्तमगः कुजः।
विवाहानन्तरं भर्त्ता त्वष्टवर्षं न जीवति।।[13]

वर-कन्या-मासाश्च ज्येष्ठत्रयं विवाहे न कदापि प्रशस्तम्। ज्येष्ठे मासे ज्येष्ठे वधूवरयोर्विवाहो नैव कार्यः। यथा वराहेण-

द्वौ ज्येष्ठो मध्यमौ प्रोक्तावेकज्येष्ठः शुभावहः।
ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसम्मतम्।।[14]

ज्योतिःप्रकाशेऽपि -

प्रतिकूलेपि कर्त्तव्यो विवाहो मासमन्तरा।
शान्तिं विधाय गां दत्वा वाग्दानादिचरेद् बुधः।।[15]

चूड़ाव्रत-उपनयन-समावर्तन-विवाहादिसंस्कारेषु पुरुषत्रयं नैव नेष्टमिति निगदति श्रीरामाचार्यः-

चूड़ाव्रतं चापि विवाहतो वृत्तात्त्चूड़ न नेष्टा पुरुषत्रयान्तरे।
वधूप्रवेशाच्च सुताविनिर्गमः षष्मासतोवाब्द विभेदतः शुभः।।[16]

तत्रैव मूलादिदुष्टनक्षत्रोत्पन्नयोर्वधूवरयोर्विवाहे श्वसुरादिपीडनं भणति -

श्वस्रूविनाशमहिजौ सुतरां विधत्तः
कन्यासुतो निर्ऋतिजौश्वशुरं हतश्च।
ज्येष्टाभजाततनया स्ववधसवाग्रजं च
शक्राग्निजा भवति देवरनाशकर्त्री।।[17]

आश्लेषोत्पन्नौ कन्यासुतौ श्वसुरं मारयतः। तत्रैव विशाखामूलाश्लेषोत्पन्नं प्रति दोषापवादं कथयति –

द्वीशाद्यपादत्रयजा कन्यादेवर सौख्यदा।
मूलान्त्य पादसर्वाद्य पादजातौ तयोः शुभौ।।[18]

वरवध्वोः गुणदोषविचार अवश्यमेव कर्त्तव्यम्। अतो तयोः मेलकसंबन्धविचारः कथयति–

वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम्।
गणमैत्रं भकूटं च नाड़ी चैते गुणाधिका।।[19]

एते राशिकूटभेदा वार्णादिमैत्र्यां सत्यां गुणाधिका अर्थात् एकादिगुणाधिकाभवन्ति ।यथा वर्णमैत्र्यामेको गुणः, वश्ये द्वौ गुणौ, तारायां त्रयो गुणाः, योनिमैत्रीविचारे चत्वारो गुणाः, ग्रहमैत्रीविषये पञ्च, गणमैत्र्यां षट्, सद्मकूटे सप्तनाड़ी भेदे चाष्टौ इत्यनेन विारः करणीयः। दैवज्ञमनोहरे यथा–

नाड़ीभेदे गुणा अष्टौ सप्त सद्राशिकूटके।
षड्गुणगणमैत्र्यां च सौहार्द्रे पञ्चखेटयोः।।
योनिमैत्र्यां च चत्वारस्त्रयस्ताराबले गुणाः।
वश्यत्वे द्वागुणौ प्रोक्तौ वर्ण एकः प्रकीर्त्तितः।।[20]

एवम्प्रकारेण स्त्रीणां सौभाग्यादिसंरक्षणार्थ दाम्पत्यजीवनस्य सुखसौमनस्यावाप्तिकामनायै ज्योतिषदिशा विधिविचारं करणीयमिति।

## संदर्भ सूची


1. वास्तुरत्नावली भूमिका।
2. मु.चि.वि.प्र.सङ्कलितम्।
3. मु.चि.वि.प्र.श्लो. 1
4. मु.चि.विवाहप्र. सङ्कलितमत्रैव।
5. मु.चि.विवाहप्र. सङ्कलितम्।
6. मु.चि.विवाहप्र. सङ्कलितमत्रैव।
7. मु.चि.विवाहप्र. सङ्कलितमत्रैव।
8. सङ्कलितमत्रैव।
9. मु.चि.विवाहप्र. सङ्कलितम्।
10. मु.चि.विवाहप्र. श्लो. 3
11. मु.चि.विवाहप्र. श्लो. 4
12. मु.चि.विवाहप्र. सङ्कलितम्।
13. मु.चि.विवाहप्र. सङ्कलितम्।
14. बृहत्संहिता, विवाहपटलतः सङ्कलितम्।
15. सर्ववचनसं. विवाहप्र. श्लो. 17
16. मु.चि.विवाहप्र. श्लो. 18
17. मु.चि.विवाहप्र. श्लो. 19
18. मु.चि.विवाहप्र. श्लो. 20
19. मु.चि.विवाहप्र. श्लो. 21
20. मु.चि.विवाहप्र. श्लो. 21 सङ्कलितम्।